श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकूर्म पुराणे

# ॥ श्रीकूर्मस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीकूर्मस्तुतिः ॥

मुनय ऊचुः ।
नमस्ते कूर्मरूपाय विष्णवे परमात्मने।
नारायणाय विश्वाय वासुदेवाय ते नमः॥ १ ॥

नमो नमस्ते कृष्णाय गोविन्दाय नमो नमः।
माधवाय च ते नित्यं नमो यज्ञेश्वराय च॥ २ ॥

सहस्रशिरसे तुभ्यं सहस्राक्षाय ते नमः।
नमः सहस्रहस्ताय सहस्रचरणाय च॥ ३ ॥

ओं नमो ज्ञानरूपाय विष्णवे परमात्मने।
आनन्दाय नमस्तुभ्यं मायातीताय ते नमः॥ ४ ॥

नमो गूढशरीराय निर्गुणाय नमोऽस्तु ते।
पुरुषाय पुराणाय सत्तामात्रस्वरूपिणे॥ ५ ॥

नमः साङ्ख्याय योगाय केवलाय नमोऽस्तु ते।
धर्मज्ञानाभिगम्याय निष्कलाय नमोऽस्तु ते॥ ६ ॥

नमस्ते योगतत्त्वाय महायोगेश्वराय च।
परावराणां प्रभवे वेदवेद्याय ते नमः॥ ७ ॥

नमो बुद्धाय शुद्धाय नमो मुक्ताय हेतवे।
नमो नमो नमस्तुभ्यं मायिने वेधसे नमः॥ ८ ॥

नमोऽस्तु ते वराहाय नारसिंहाय ते नमः।
वामनाय नमस्तुभ्यं हृषीकेशाय ते नमः॥ ९ ॥

नमोऽस्तु कालरुद्राय कालरूपाय ते नमः।
स्वर्गापवर्गदात्रे च नमोऽप्रतिहतात्मने॥ १० ॥

www.prapatti.com

नमो योगाधिगम्याय योगिने योगदायिने।
देवानां पतये तुभ्यं देवार्तिशमनाय ते॥ ११ ॥

भगवंस्त्वत्प्रसादेन सर्वसंसारनाशनम्।
अस्माभिर्विदितं ज्ञानं यज्ज्ञात्वामृतमश्नुते॥ १२ ॥

श्रुताश्च विविधा धर्मा वंशा मन्वन्तराणि च।
सर्गश्च प्रतिसर्गश्च ब्रह्माण्डस्यास्य विस्तरः॥ १३ ॥

त्वं हि सर्वजगत्साक्षी विश्वो नारायणः परः।
त्रातुमर्हस्यनन्तात्मा त्वामेव शरणं गताः॥ १४ ॥

॥ इति श्रीकूर्मस्तुतिः संपूर्णा ॥

www.prapatti.com